श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री परकालमठं तनियन् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीलक्ष्मीहयवदनलक्ष्मीनारायणाभ्यां नमः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री परकालमठं तनियन् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्ब्रह्मतन्त्रस्वतन्त्रपरकालश्रीमठीयचक्राङ्कनगुरुपरम्परा

अस्मद्गुरुभ्यो नमः।
अस्मत्परमगुरुभ्यो नमः।
अस्मत्सर्वगुरुभ्यो नमः।
श्रीमते वेदान्तगुरवे नमः।
श्रीमते रामानुजाय नमः।
श्री महापूर्णाय नमः।
श्रीमद्यामुनमुनये नमः।
श्रीराममिश्राय नमः।
श्रीपुण्डरीकाक्षाय नमः।
श्रीनाथमुनये नमः।
श्रीमते शठकोपाय नमः।
श्रीमते विष्वक्सेनाय नमः।
श्रियै नमः।
श्रीधराय नमः॥

अस्मद्देशिकमस्मदीयपरमाचार्यन् अशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम्।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये॥

www.prapatti.com

अस्मद्गुरुसमारम्भां यतिशेखरमध्यमाम्।
लक्ष्मीवल्लभपर्यन्तां वन्दे गुरुपरम्पराम्॥

श्रीमन्नूतन रङ्गनाथ यतिराडाप्तात्म विद्यालयं
श्रीमन्नूतन लक्ष्मणार्य यतिराट् संप्राप्त तुर्याश्रमम्।
श्रीवासेन्द्र कटाक्ष सन्ततसुधालक्ष्यात्म योगाञ्चितं
श्रीमन्नूतन वागधीशयमिनं भक्त्याश्रयामो गुरुम्॥
नव्य वागीशयोगीन्द्रं हयास्यपदसेविनम्।
ब्रह्मतन्त्र स्वतन्त्रार्यं भजामस्स्वात्मसम्पदम्॥ ३६ ॥

नूत्न श्रीरङ्गनाथाग्रिमपदकलिजिल्लब्धचक्राङ्कन श्री
त्रय्यन्तद्वन्द्व तत्त्वं तदनघचरण न्यस्तभारं यतीन्द्रात्।
प्रत्यग्र श्रीनिवासात् समधिगततुरीयाश्रमं संश्रयामः
नव्यं रामानुजाख्यं कलिमथनगुरुं ब्रह्मतन्त्र स्वतन्त्रम्॥
लक्ष्मीहयास्य पादुवरिवस्यै कान्तमानसस्सततम्।
जयतु श्रीमदभिनव रामानुज संयमीन्द्र परकालः॥ ३५ ॥

श्रीकृष्णब्रह्मतन्त्राभिधकलिमथनाल्लब्धचक्राङ्क भाष्यं
नव्य श्रीरङ्गनाथे कलिमथनगुरावर्पितात्मीय भारम्।
तद्दीक्षालब्धतुर्यं हयवदन पदत्राणसेवाधुरीणं
ध्यायेयं ब्रह्मतन्त्रं कलिमथनगुरुं श्रीनिवासं नवीनम्॥
श्रीमल्लक्ष्मी हयग्रीव पादुका दिव्य सेवको वशी।
जीयान्नव्य श्रीनिवास परकाल गुरूत्तमः॥ ३४ ॥

श्रीकृष्णब्रह्मतन्त्रोत्तम गुरुकरुणाऽवाप्त चक्राङ्कभाष्यं
वैराग्याचारवार्धी वरदपदमुखे लक्ष्मणे न्यस्तभारम्।
श्रीवागीशात्तुर्यं शठरिपुयतिराड्वेद चूडार्यमूर्तिं
नूत्नं श्रीरङ्गनाथं कलिरिपुमनघं ब्रह्मतन्त्रं श्रयामः॥
श्रीतुरगवदन पादुसन्ततपरिचरणमात्र परमार्थः।
जयतु श्रीमानभिनव रङ्गेन्द्रब्रह्मतन्त्र परकालः॥ ३३ ॥

www.prapatti.com

शुभगुणनिधिं श्रीकृष्णब्रह्मतन्त्रकलिद्विषद्-
गुरुवरकृपादिव्यच्चक्राङ्कभाष्यभरार्पणम्।
तदनघकृपाराजन्मोक्षाश्रमं कलयामहे
वशिनमनघं वागीशब्रह्मतन्त्रकलिद्विषम्॥ ३२॥

श्रीवासब्रह्मतन्त्राभिधकलिमथनावाप्तचक्राङ्कभाष्यं
श्रीवासे देशिकेन्द्रे कलिमथनगुरावर्पितात्मीयभारम्।
रङ्गेद्रब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रात्ततुर्यं
श्रीकृष्णब्रह्मतन्त्राग्रिमपदपरकालार्यवर्यं श्रयामः॥ ३१॥

रङ्गेश देशिकेन्द्र श्रीनिधि वेदवतंस घण्टांशान्।
रामावरज श्रीनिधि वेदान्त श्रीनिधीन्नमस्यामः॥

परकाल वेदान्त वरदादि निगमशिखरलक्ष्मणमुनिम्।
वन्दे वराह वरदादिमवेदान्तौ च वीरराघवमुनिम्॥

श्री ब्रह्मतन्त्रकलिजिज्ज्ञानाब्धिं वेदमौलियतिराजम्।
कवितार्किकसिंह पराङ्कुश वरदब्रह्मतन्त्रगणमीडे॥

यतिराजं ब्रह्मतन्त्रस्वतन्त्रं रङ्गभूपतिम्।
नारायणं श्रीनिवासब्रह्मतन्त्रयतिं नुमः॥

वेदान्तरामावरजं परकालयतीश्वरम्।
तृतीयब्रह्मतन्त्रश्रीनिवासयतिमाश्रये॥

द्वितीयब्रह्मतन्त्राख्यं मुनिं वेदान्तलक्ष्मणम्।
प्रथमं श्रीब्रह्मतन्त्रस्वतन्त्रयतिमाश्रये॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिहंसाम्बुदरङ्गराजरामानुजाचार्यनतार्तिहन्तॄन्।
यतीन्द्ररामानुजपूर्णवर्यकलिन्दजातीरनिवासिरामान्॥

पद्माक्षनाथार्यशठारिविष्वक्सेनेशपद्माकमलाधिनाथान्।
मन्त्राढ्यसंरक्षितजीवलोकान्नतेन मूर्ध्ना प्रणमाम्यभीक्ष्णम्॥

श्रीमते श्रीलक्ष्मीहयग्रीवदिव्यपादुकासेवक श्रीमदभिनव
रङ्गनाथब्रह्मतन्त्रपरकालमहादेशिकाय नमः॥

इत्यारोहगुरुपरम्पराऽनुसन्धानक्रमः

*********

## अवरोहगुरुपरम्पराऽनुसन्धानक्रमः

लक्ष्मीनाथसमारम्भां नाथ यामुनमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम्।
प्रवक्ताच्छन्दसां वक्ता पञ्चरात्रस्य यस्स्वयम्॥

सहधर्मचरीं शौरेः सम्मन्त्रितजगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहम्॥

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम्॥

यस्य सारस्वतं स्रोतो वकुळामोदवासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम्॥

नमस्याम्यरविन्दाक्षं नाथभावेव्यवस्थितम्।
शुद्धसत्वमयं शौरेः अवतारमिवापरम्॥

अनुज्झितक्षमायोगं अपुण्यजनबाधकम्।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे॥



www.prapatti.com

विगाहे यामुनं तीर्थं साधुबृन्दावनेस्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णःकृतादरः॥

दयानिधिं यतीन्द्रस्य देशिकं पूर्णमाश्रये।
येन विश्वसृजो विष्णोः अपूर्यतमनोरथः॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम्।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम्॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणितृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो
रामानुजस्य चरणौ शरणं प्रपद्ये॥

आत्रेयगोत्रसम्भूतमाश्रये श्रितवत्सलम्।
यतीन्द्रमाहानसिकं प्रणतार्तिहरं गुरुम्॥

आत्रेयगोत्राम्बुधिपूर्णचन्द्रमाचारयुक्तात्मगुणोपपन्नम्।
नतार्तिहृद्देशिकरत्नसूनुं रामानुजार्यं गुरुमाश्रयामः॥

रामानुजार्यतनयं रमणीयवेषं
आत्रेयमात्मगुणपूर्णमनर्घशीलम्।
श्रीरङ्गराजमिव तद्दयया‌ऽवतीर्णं
श्रीरङ्गराजगुरुवर्यमहं प्रपद्ये॥

श्रीमच्छ्रीरङ्गराजाह्वयगुरुतनयं श्रीमदात्रेयगोत्रं
श्रेयोहेतुं नतानां वरदगुरुकृपाऽवाप्तसच्छास्त्रजातम्।
वेदान्ताचार्यवर्ये कृतसकरहस्तत्त्वशास्त्रादिदानं
वन्दे रामानुजार्यं गुरुवरतिलकं वादिहंसाम्बुवाहम्॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि॥

www.prapatti.com

पर्यायभाष्यकाराय प्रणतार्तिं विधून्वते।
ब्रह्मतन्त्रस्वतन्त्राय द्वितीयब्रह्मणे नमः॥ १॥

ब्रह्मतन्त्रकृपावाप्त ज्ञानयाथात्म्यसम्पदम्।
नमामि वात्स्यवेदान्तरामानुजमुनीश्वरम्॥ २॥

श्रयामो वात्स्यवेदान्तरामानुजकृपास्पदम्।
ब्रह्मतन्त्रस्वतन्त्रश्रीश्रीनिवासगुरूत्तमम्॥ ३॥

ब्रह्मतन्त्ररमावासगुरुवीक्षितमुत्तमम्।
परकालगुरुं वन्दे चिरकालं दयानिधिम्॥ ४॥

श्रयामहे श्रीपरकालमौनिपदाश्रयं तत्कृपयाऽऽत्ततुर्यम्।
वेदान्तविद्यानिलयं महान्तं वेदान्तरामानुजसंयमीन्द्रम्॥ ५॥

वेदान्तलक्ष्मणमुनीश्वरपादपद्म-
 युग्माश्रयं सकलसद्गुणवारिराशिम्।
तत्प्राप्ततुर्यमनघं कमलानिवास
 श्रीब्रह्मतन्त्रगुरुवर्यमहं प्रपद्ये॥ ६॥

श्रीनिवासब्रह्मतन्त्रकृपासारपरिप्लुतम्।
श्रीनारायणयोगीन्द्रं ब्रह्मतन्त्रगुरुं भजे॥ ७॥

नारायणाख्यमुनिवर्यकृपाकटाक्ष-
 वीक्षावशात्तचरमाश्रमतत्त्वसारम्।
तद्दिव्यपादसरसीरुहदत्तभारं
 श्रीरङ्गराजयतिराजमुपासिषीय॥ ८॥

रङ्गराजयतिवर्यवीक्षितं तत्कृपात्तनिगमाञ्चलद्वयम्।
तत्पदार्पितभरं दयानिधिं ब्रह्मतन्त्रयतिवर्यमाश्रये॥ ९॥

श्रीब्रह्मतन्त्रपादाब्जसंश्रयावाप्तसम्पदम्।
यतिराजं भजामः श्रीयतिराजाह्वयं गुरुम्॥ १०॥

यतिराजयतीन्द्राङ्घ्रिसमाश्रयसमेधितम्।
वरदब्रह्मतन्त्रार्यं वरदं संश्रयामहे॥ ११ ॥

भजामहे वरदयतीन्द्रसत्कृपा-
समेधितं सकलमहागुणाम्बुधिम्।
वदावदद्विरदचमूपराङ्कुशं
पराङ्कुशं यतितिलकं निरङ्कुशम्॥ १२ ॥

पराङ्कुशयतीशाङ्घ्रिकृपात्तचरमाश्रमे।
कवितार्किकसिंहेऽस्तु यतीन्द्रे मे नमश्शतम्॥ १३ ॥

कवितार्किकसिंहाख्ययतिवर्यकृपावशात्।
विवृद्धसम्पदं वन्दे वेदान्तयतिशेखरम्॥ १४ ॥

वेदान्तयतिवर्याप्त वेदान्तयुगळाशयम्।
ज्ञानाब्धिब्रह्मतन्त्रपरकालगुरुं भजे॥ १५ ॥

ज्ञानाम्बुधिब्रह्मतन्त्रपरकालमहागुरोः।
अवाप्त तुर्यं वन्देऽहं वीरराघवयोगिनम्॥ १६ ॥

वीरराघवयोगीन्द्रविशेषकरुणेक्षितम्।
नमामि मूर्ध्ना वरदवेदान्तमुनिपुङ्गवम्॥ १७ ॥

श्रीमद्वरदवेदान्तसंयमीन्द्रपदाश्रयम्।
श्रीवराहब्रह्मतन्त्रस्वतन्त्रगुरुमाश्रये॥ १८ ॥

श्रीवराहब्रह्मतन्त्रकृपास्पदमुपास्महे।
वेदान्तलक्ष्मणाभिख्यब्रह्मतन्त्रमहागुरुम्॥ १९ ॥

श्रीमद्वराहमुनिवीक्षितलब्धबोधं
श्रीतातयार्यकरुणापरिणाहपात्रम्।
वेदान्तलक्ष्मणमुनीन्द्रपदाब्जभृङ्गं
वन्दे सदा वरदवेदशिरोयतीन्द्रम्॥



www.prapatti.com

वेदान्तदेशिकश्रेष्ठसिद्धन्तोद्धारधूर्वहम्।
वेदान्तसंयमीशानं श्रयेमकरुणानिधिम्॥ २० ॥

विन्यस्तात्मभरं वरप्रदगुरौ तद्देशिकैर्वीक्षितं
श्रीवेदान्तयतीन्द्रभूरिकृपया संप्राप्तमोक्षाश्रमम्।
सारार्थमृतलाभवन्तमनघाच्छ्री श्रीनिवासाद्गुरोः
वन्दे श्रीपरकालयोगिनमहं वेदान्तविद्यागुरुम्॥ २१ ॥

श्रीमच्छ्रीपरकालसंयमिवरादात्तापवर्गाश्रम
श्रुत्यन्तद्वयसारसारथिवचोभाष्यार्थसंयग्धियम्।
श्रीमत्तातगुरौ समर्पितभरं तत्पादपद्माश्रयं
श्रीवासं परकालयोगितिलकं दान्तं श्रयामोऽन्वहम्॥
ज्ञानाम्बुराशिपरकालगुरोरवाप्त
वेदान्तयुग्मचरमाश्रमसंप्रदायम्।
श्रीतातदेशिकपदार्पितनैजभारं
श्रीश्रीनिवासपरकालगुरुं श्रयामः॥ २२ ॥

पद्मावासकलिद्विषन्मुनिवरश्रीपादसेवार्जित-
श्रुत्यन्तद्वयसारसारथिवचस्तात्पर्यतुर्याश्रमम्।
श्रीमद्वेदवतंसयुग्मविशदीकरैकबद्धस्पृहं
श्रीवेदान्तकलिद्विषं मुनिवरं सेवे शमाम्भोनिधिम्॥ २३ ॥

पद्मानिवासपरकालयतीन्द्रलब्ध-
सारार्थवेदशिकरादिमसंप्रदायम्।
तत्पाददत्तभरमुत्तमचित्तवृत्तिं
श्रीश्रीनिवासपरकालगुरुं श्रयामः॥ २४ ॥

वन्देय श्रीनिलयपरकालात्त वेदान्तयुग्मं
तत्पादाब्जे विनिहितभरं ब्रह्मतन्त्रात्ततुर्यम्।
श्रीकृष्णार्यादधिगतरथाङ्गाब्जमब्जाक्षहृद्यं
श्रीमद्रामावरजपरकालाभिधं देशिकेन्द्रम्॥ २५ ॥

रामानुजादिपरकालयतीन्द्रलब्ध
वेदान्तयुग्मचरमाश्रमसंप्रदायम्।
श्रीशिङ्गरार्यगुरुवीक्षितमात्मवन्तं
घण्टावतारपरकालगुरुं श्रयामः॥
वेदान्तदेशिकेन्द्रस्य सिद्धान्तस्थापनोत्सुकः।
जयतु श्रीशघण्टांशपरकालगुरूत्तमः॥ २६॥

श्रीमद्रामानुजाद्यैः कलिरिपुगुरुभिर्वीक्षितं ब्रह्मतन्त्र
श्रीमद्घण्टावतारोत्तमकलिमथनाङ्घ्र्यब्जविन्यस्तभारम्।
तद्दीक्षा लब्धवेदाञ्चलयुगळतुरीयाश्रमं शान्तिभूमिं
वेदान्तब्रह्मतन्त्राभिधकलिमथनाचार्यवर्यं प्रपद्ये॥ २७॥

श्रीमद्घण्टावतारोत्तमकलिमथनावाप्त सत्संप्रदाय
श्रीभाष्य श्रीरहस्यत्रयसृतिमदसीयाङ्घ्रि विन्यस्तभारम्।
वेदान्तब्रह्मतन्त्राभिधकलिमथनाल्लब्ध तुर्याश्रमं श्री
श्रीवासब्रह्मतन्त्रादिमपदपरकालाख्यमाचार्यमीडे॥ २८॥

श्रीमद्घण्टावतारोत्तमकलिमथनालब्ध चक्राङ्कभाष्यं
वेदान्तब्रह्मतन्त्रोत्तमकलिमथनश्रीपदन्यस्तभारम्।
श्रीवासब्रह्मतन्त्रोत्तमकलिमथनोपात्ततत्त्वार्थतुर्यं
वन्दे श्रीब्रह्मतन्त्रं कलिमथनरमावाससद्देशिकेन्द्रम्॥ २९॥

श्रीघण्टांशात्तचक्राङ्कनमुदितहृदं प्राप्त वेदान्तयुग्मं
वेदान्तार्यदधीताहित निगमभरं श्रीनिवासाङ्घ्रियुग्मात्।
श्रीमच्छ्रीवासदेशिकवरपुरुहूतात्त तुर्याश्रमं तं
वन्दे श्रीरङ्गनाथं कलिमथनगुरुं ब्रह्मतन्त्राद्यशब्दम्॥
श्रीरामानुजसिद्धन्तस्थापको जयतान्दयम्।
रङ्गनाथब्रह्मतन्त्रपरकालयतीश्वरः॥ ३०॥

श्रीवासब्रह्मतन्त्राभिधकलिमथनावाप्तचक्राङ्कभाष्यं
श्रीवासे देशिकेन्द्रे कलिमथनगुरावर्पितात्मीयभारम्।

रङ्गेद्रब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रात्ततुर्यं
श्रीकृष्णब्रह्मतन्त्राग्रिमपदपरकालार्यवर्यं श्रयामः ॥ ३१ ॥

शुभगुणनिधिं श्रीकृष्णब्रह्मतन्त्रकलिद्विषद्-
गुरुवरकृपादिव्यच्चक्राङ्कभाष्यभरार्पणम्।
तदनघकृपाराजन्मोक्षाश्रमं कलयामहे
वशिनमनघं वागीशब्रह्मतन्त्रकलिद्विषम्॥ ३२ ॥

श्रीकृष्णब्रह्मतन्त्रोत्तम गुरुकरुणाऽवाप्त चक्राङ्कभाष्यं
वैराग्याचारवार्धौ वरदपदमुखे लक्ष्मणे न्यस्तभारम्।
श्रीवागीशात्ततुर्यं शठरिपुयतिराड्वेद चूडार्यमूर्तिं
नूत्नं श्रीरङ्गनाथं कलिरिपुमनघं ब्रह्मतन्त्रं श्रयामः॥
श्रीतुरगवदन पादूसन्ततपरिचरणमात्र परमार्थः।
जयतु श्रीमानभिनव रङ्गेन्द्रब्रह्मतन्त्र परकालः॥ ३३ ॥

श्रीकृष्णब्रह्मतन्त्राभिधकलिमथनाल्लब्धचक्राङ्क भाष्यं
नव्य श्रीरङ्गनाथे कलिमथनगुरावर्पितात्मीय भारम्।
तद्दीक्षालब्धतुर्यं हयवदन पदत्राणसेवाधुरीणं
ध्यायेयं ब्रह्मतन्त्रं कलिमथनगुरुं श्रीनिवासं नवीनम्॥
श्रीमल्लक्ष्मी हयग्रीव पादुका दिव्य सेवको वशी।
जीयान्नव्य श्रीनिवास परकाल गुरूत्तमः॥ ३४ ॥

नूत्न श्रीरङ्गनाथाग्रिमपदकलिजिल्लब्धचक्राङ्कन श्री
त्रय्यन्तद्वन्द्व तत्त्वं तदनघचरण न्यस्तभारं यतीन्द्रात्।
प्रत्यग्र श्रीनिवासात् समधिगततुरीयाश्रमं संश्रयामः
नव्यं रामानुजाख्यं कलिमथनगुरुं ब्रह्मतन्त्र स्वतन्त्रम्॥
लक्ष्मीहयास्य पादूवरिवस्यै कान्तमानसस्सततम्।
जयतु श्रीमदभिनव रामानुज संयमीन्द्र परकालः॥ ३५ ॥

श्रीमन्नूतन रङ्गनाथ यतिराडाप्तात्म विद्यालयं
श्रीमन्नूतन लक्ष्मणार्य यतिराट् संप्राप्त तुर्याश्रमम्।
श्रीवासेन्द्र कटाक्ष सन्ततसुधालक्ष्यात्म योगाञ्चितं



www.prapatti.com

श्रीमन्नूतन वागधीशयमिनं भक्त्याश्रयामो गुरुम्॥
नव्य वागीशयोगीन्द्रं हयास्यपदसेविनम्।
ब्रह्मतन्त्र स्वतन्त्रार्यं भजामस्स्वात्मसम्पदम्॥ ३६ ॥

इत्यवरोहगुरुपरम्पराऽनुसन्धानक्रमः

*********



www.prapatti.com

## सङ्क्षिप्त श्री ब्रह्मतन्त्र स्वतन्त्र परकाल मठीय तनियन्

लक्ष्मीनाथ समारंभां नाथयामुन मध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

पर्याय भाष्यकाराय प्रणतार्तिं विधून्वते
ब्रह्मतन्त्र स्वतन्त्राय द्वितीय ब्रह्मणे नमः।
श्री ब्रह्मतन्त्रं यतिवर्यमाद्यं
वेदान्तरामानुज योगिवर्यम्॥

श्री ब्रह्मतन्त्राख्य रमानिवासं
वन्दे यतीन्द्रं परकालसञ्ज्ञम्।
वेदान्तरामानुज मानिवास
श्रीब्रह्मतन्त्रौर्यमिनां वरिष्ठौ॥

नारायणाख्यं मुनिवर्यमीडे
श्रीरङ्गराजाभिध योगिनञ्च।
श्रीब्रह्मतन्त्र यतिराज गुरूप्रपद्ये
श्रीब्रह्मतन्त्रमपरं वरदाद्यशब्दम्॥

श्रीमत्पराङ्कुशमुनिं कवितार्किकेन्द्र।
सिंहं भजेम निगमान्त यतीश्वरञ्च॥

ज्ञानाब्धि प्रथमपदं भजेम हि ब्रह्मतन्त्र परकालम्।
श्री वीरराघवाख्यं वरदश्रुत्यन्त गुरुमपि भजामः॥

श्रीमद्वराहं वेदान्तलक्ष्मणं मुनिपुङ्गवम्।
श्रीमद्वरदवेदान्त यतीन्द्रं चाश्रयामहे॥

विन्यस्तात्मभरं वरप्रदगुरौ तद्देशिकैर्वीक्षितं।
श्रीवेदान्तयतीन्द्रभूरिकृपया संप्राप्तमोक्षाश्रमम्।
सारार्थमृतलाभवन्तमनघाच्छ्री श्रीनिवासाद्गुरोः
वन्दे श्रीपरकालयोगिनमहं वेदान्तविद्यागुरुम्॥ २१॥

श्रीमच्छ्रीपरकालसंयमिवरादात्तापवर्गाश्रम
श्रुत्यन्तद्वयसारसारथिवचोभाष्यार्थसंयग्धियम्।
श्रीमत्तातगुरौ समर्पितभरं तत्पादपद्माश्रयं
श्रीवासं परकालयोगितिलकं दान्तं श्रयामोऽन्वहम्॥
ज्ञानाम्बुराशिपरकालगुरोरवाप्त
वेदान्तयुग्मचरमाश्रमसंप्रदायम्।
श्रीतातदेशिकपदार्पितनैजभारं
श्रीश्रीनिवासपरकालगुरुं श्रयामः॥ २२॥

पद्मावासकलिद्विषन्मुनिवरश्रीपादसेवार्जित-
श्रुत्यन्तद्वयसारसारथिवचस्तात्पर्यतुर्याश्रमम्।
श्रीमद्वेदवतंसयुग्मविशदीकरैकबद्धस्पृहं
श्रीवेदान्तकलिद्विषं मुनिवरं सेवे शमाम्भोनिधिम्॥ २३॥

पद्मानिवासपरकालयतीन्द्रलब्ध-
सारार्थवेदशिकरादिमसंप्रदायम्।
तत्पाददत्तभरमुत्तमचित्तवृत्तिं
श्रीश्रीनिवासपरकालगुरुं श्रयामः॥ २४॥

वन्देय श्रीनिलयपरकालात्त वेदान्तयुग्मं
तत्पादाब्जे विनिहितभरं ब्रह्मतन्त्रात्ततुर्यम्।
श्रीकृष्णार्यादधिगतरथाङ्गाब्जमब्जाक्षहृद्यं
श्रीमद्रामावरजपरकालाभिधं देशिकेन्द्रम्॥ २५॥

रामानुजादिपरकालयतीन्द्रलब्ध
वेदान्तयुग्मचरमाश्रमसंप्रदायम्।
श्रीशिङ्गरार्यगुरुवीक्षितमात्मवन्तं
घण्टावतारपरकालगुरुं श्रयामः॥
वेदान्तदेशिकेन्द्रस्य सिद्धान्तस्थापनोत्सुकः।
जयतु श्रीशघण्टांशपरकालगुरूत्तमः॥ २६॥

श्रीमद्रामानुजाद्यैः कलिरिपुगुरुभिर्वीक्षितं ब्रह्मतन्त्र
    श्रीमद्घण्टावतारोत्तमकलिमथनाङ्घ्र्यब्जविन्यस्तभारम्।
तद्दीक्षा लब्धवेदाञ्चलयुगळतुरीयाश्रमं शान्तिभूमिं
    वेदान्तब्रह्मतन्त्राभिधकलिमथनाचार्यवर्यं प्रपद्ये॥ २७ ॥

श्रीमद्घण्टावतारोत्तमकलिमथनावाप्त सत्संप्रदाय
    श्रीभाष्य श्रीरहस्यत्रयसृतिमदसीयाङ्घ्रि विन्यस्तभारम्।
वेदान्तब्रह्मतन्त्राभिधकलिमथनाल्लब्ध तुर्याश्रमं श्री
    श्रीवासब्रह्मतन्त्रादिमपदपरकालाख्यमाचार्यमीडे॥ २८ ॥

श्रीमद्घण्टावतारोत्तमकलिमथनालब्ध चक्राङ्कभाष्यं
    वेदान्तब्रह्मतन्त्रोत्तमकलिमथनश्रीपदन्यस्तभारम्।
श्रीवासब्रह्मतन्त्रोत्तमकलिमथनोपात्ततत्त्वार्थतुर्यं
    वन्दे श्रीब्रह्मतन्त्रं कलिमथनरमावाससद्देशिकेन्द्रम्॥ २९ ॥

श्रीघण्टांशात्तचक्राङ्कनमुदितहृदं प्राप्त वेदान्तयुग्मं
    वेदान्तार्यदधीताहित निगमभरं श्रीनिवासाङ्घ्रियुग्मात्।
श्रीमच्छ्रीवासदेशिकवरपुरुहूतात्त तुर्याश्रमं तं
    वन्दे श्रीरङ्गनाथं कलिमथनगुरुं ब्रह्मतन्त्राद्यशब्दम्॥
श्रीरामानुजसिद्धन्तस्थापको जयतान्दयम्।
    रङ्गनाथब्रह्मतन्त्रपरकालयतीश्वरः ॥ ३० ॥

श्रीवासब्रह्मतन्त्राभिधकलिमथनावाप्तचक्राङ्कभाष्यं
    श्रीवासे देशिकेन्द्रे कलिमथनगुरावर्पितात्मीयभारम्।
रङ्गेंद्रब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रात्ततुर्यं
    श्रीकृष्णब्रह्मतन्त्राग्रिमपदपरकालार्यवर्यं श्रयामः ॥ ३१ ॥

शुभगुणनिधिं श्रीकृष्णब्रह्मतन्त्रकलिद्विषद्-
    गुरुवरकृपादिव्यच्चक्राङ्कभाष्यभरार्पणम्।
तदनघकृपाराजन्मोक्षाश्रमं कलयामहे
    वशिनमनघं वागीशब्रह्मतन्त्रकलिद्विषम्॥ ३२ ॥

www.prapatti.com

श्रीकृष्णब्रह्मतन्त्रोत्तम गुरुकरुणाऽवाप्त चक्राङ्कभाष्यं
वैराग्याचारवार्धौ वरदपदमुखे लक्ष्मणे न्यस्तभारम्।
श्रीवागीशात्ततुर्यं शठरिपुयतिराड्वेद चूडार्यमूर्तिं
नूत्नं श्रीरङ्गनाथं कलिरिपुमनघं ब्रह्मतन्त्रं श्रयामः॥
श्रीतुरगवदन पादूसन्ततपरिचरणमात्र परमार्थः।
जयतु श्रीमानभिनव रङ्गेन्द्रब्रह्मतन्त्र परकालः॥ ३३॥

श्रीकृष्णब्रह्मतन्त्राभिधकलिमथनाल्लब्धचक्राङ्क भाष्यं
नव्य श्रीरङ्गनाथे कलिमथनगुरावर्पितात्मीय भारम्।
तद्दीक्षालब्धतुर्यं हयवदन पदत्राणसेवाधुरीणं
ध्यायेयं ब्रह्मतन्त्रं कलिमथनगुरुं श्रीनिवासं नवीनम्॥
श्रीमल्लक्ष्मी हयग्रीव पादुका दिव्य सेवको वशी।
जीयान्नव्य श्रीनिवास परकाल गुरूत्तमः॥ ३४॥

नूत्न श्रीरङ्गनाथाग्रिमपदकलिजिल्लब्धचक्राङ्कन श्री
त्रय्यन्तद्वन्द्व तत्त्वं तदनघचरण न्यस्तभारं यतीन्द्रात्।
प्रत्यग्र श्रीनिवासात् समधिगततुरीयाश्रमं संश्रयामः
नव्यं रामानुजाख्यं कलिमथनगुरुं ब्रह्मतन्त्र स्वतन्त्रम्॥
लक्ष्मीहयास्य पादूवरिवस्यै कान्तमानसस्सततम्।
जयतु श्रीमदभिनव रामानुज संयमीन्द्र परकालः॥ ३५॥

श्रीमन्नूतन रङ्गनाथ यतिराडाप्तात्म विद्यालयं
श्रीमन्नूतन लक्ष्मणार्य यतिराट् संप्राप्त तुर्याश्रमम्।
श्रीवासेन्द्र कटाक्ष सन्ततसुधालक्ष्यात्म योगाञ्चितं
श्रीमन्नूतन वागधीशयमिनं भक्त्याश्रयामो गुरुम्॥
नव्य वागीशयोगीन्द्रं हयास्यपदसेविनम्।
ब्रह्मतन्त्र स्वतन्त्रार्यं भजामस्स्वात्मसम्पदम्॥ ३६॥

॥ इति परकालमठं तनियन् सम्पूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com